# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहिःस्थ**

**परीक्षा : मे – २०२४**

**सत्र २ रे**

**विषयः संस्कृतभाषाकौशल–२** (23E426)

**दिनांक :२७/०५/२०२४** **गुण :१००** **वेळ : स. १०.०० ते १.००**

**सूचना :** सर्व प्रश्न अनिवार्य

प्र.१. अ. **सुभाषितानाम् अर्थ माध्यमभाषया लिखत।(५तः४)** (२०)

१. विकृतिं नैव गच्छन्ति सङ्गदोषेण साधवः।
आवेष्टितं महासर्पैश्चन्दनं न विषायते।।

२. अग्निः काष्ठाज्जायते मथ्यमानाद्भूमिस्तोयं खन्यमाना ददाति।
सोत्साहानां नास्त्यसाध्यं नराणां मार्गारब्धाः सर्वयत्नाः फलन्ति।।

३. क्वचिद्वीणावाद्यं क्वचिदपि च हा हेति रुदितं क्वचिद्रामा रम्या क्वचिदपि जराजर्जरतनुः।
क्वचिद्विद्वद्गोष्ठी क्वचिदपि सुरामत्तकलहो न जाने संसारः किममृतमयः किं विषमयः।।

४. जातः सूर्यकुले पिता दशरथः क्षोणीभृतामग्रणीः सीता सत्यपरायणा प्रणयिनी यस्यानुजो लक्ष्मणः।
दोर्दण्डेन समो न चास्ति भुवने प्रत्यक्षविष्णुः स्वयं रामो येन विडम्बितोऽपि विधिना चान्ये जने का कथा।।

५. सौरभ्यं भुवनत्रयेऽपि विदितं शैत्यं नु लोकोत्तरं कीर्तिः किंच दिगङ्गनाङ्गणगता किं त्वेतदेकं शृणु।
सर्वानेव गुणानियं निगिरति श्रीखण्ड ते सुन्दरानुज्झन्ती खलु कोटरेषु गरलज्वालां द्विजिह्वावली।।

आ) **एकं निबन्धं संस्कृतेन लिखत।(३तः१)** (१०)

१. मनःशक्तिर्बलीयसी। २. कविकुलगुरुः कालिदासः। ३. एकविंशतितमे शतके भारतदेशः।

प्र.२. अ) **कथाम् उचितशब्दैः पूरयत।** (१०)

अस्ति कस्मिंश्चित् ______मदोन्मत्तः नाम सिंहः। सः अजस्रम् एव मृगोत्सादनं कुरुते। अथ ते मृगाः मिलित्वा तं मृगराजं ____, "देव, किम् अनेन निष्कारणं कृतेन _____उत्सादनकर्मणा। वयं विनष्टाः भविष्यामः तवापि _____ । तत् प्रसीद। वयस् एव तवाहारार्थम् एकैकं पशुं ____ प्रेषयिष्यामः" इति। "एवम् अस्तु" इति सः अवदत्। ततः प्रभृति सः प्रतिदिनं तैः प्रेषितं मृगं भक्षयति। एकदा कस्यचित् शशकस्य वारः समायातः। सः अचिन्तयत्, "किं अधुना करिष्ये। केनोपायेनात्मानं
______,तं च दुरात्मानं व्यापरयिष्यामि येन सर्वे मृगाः ______ भविष्यन्ति सुखेन च कालं नेष्यन्ति" इति। ततः सः शशकः आहारवेलातिक्रमं कृत्वा ______ अगच्छत्। सिंहः अपि क्षुत्क्षामकण्ठः कोपाविष्टः तम् आह, "कः अयं वेलात्ययः। अधुना एव त्वं ______गमिष्यसि" इति। अथ प्रणम्य शशकः अभाषत, "स्वामिन्, नायं ममापराधः अहम् आगच्छन् मार्गे ।_____ निरुद्धः। ततः मयाभिहितम्। अहं स्वामिनः मदोन्मत्तस्य सिंहस्य भोजनार्थं प्रस्थितः।"
(मञ्जूषा- पञ्चत्वम्, प्रतिदिनम्, रक्षिष्यामि, विज्ञापितवन्तः, निर्भयाः, सिंहान्तरेण, आहारभावः वनोद्देशे, मन्दं मन्दम्, सर्वमृगाणाम् )

आ) **संवादम् उचितशब्दैः पूरयत।** (१०)

विभा–हेमाङ्गिनि, तिष्ठ।
हेमाङ्गिनी– अहो विभा। ----- , कुत्र गच्छसि?
विभा– अहं पत्रालयं गच्छामि। सकीनापि एव गच्छामि।
हेमाङ्गिनी – अहमेव------ सह पत्रालयम् एव गच्छामि।
सकीना–पश्यत।------- दृश्यते। सः पत्राणि आनयति वितरति च।
विभा–सत्यम्। सः ------- लिखितानि पत्राणि वितरति। किन्तु सः ----- तानि पत्राणि

आनयति?
सकीना- सः पत्रालयात् पत्राणि ------।
प्रणवः- किन्तु ------ कुतः आगच्छन्ति?
सकीना- जनाः पत्राणि लिखन्ति । ततः ----- पत्रपेटिकायां तानि पत्राणि क्षिपन्ति। पत्रवाहकः तानि पत्राणि नयति। तत्र ----- कृत्वा रेलयानेन, वायुयानेन नौकायानेन वा विविधस्थानेषु ----- च कर्मकराः तानि प्रेषयन्ति।
(मञ्जूषा-पत्रालयम्, ते , कुतः, प्रणवेन, विदेशेषु, मुद्राङ्कनम्, प्रतिदिनम्, विभे, पत्रवितरकः, आनयति)

**प्र.३. अ) वाच्यपरिवर्तनं कुरुत।(७तः५)** (१०)

१. चायपानस्य आनन्दम् अनुभवतु। २. गर्दभः भारं वहति।
३. मया संस्कृतस्य सन्दर्भः श्रुतः। ४. केचन नाट्यशास्त्रस्य अध्ययनं कुर्वन्ति।
५. एषा पद्धतिः मया स्वीकृता। ६. सः क्षेत्रपालः लम्बकर्णं दृष्टवान्।
७. गुरुः उक्तवान्।

**आ) अनुच्छेदं पठित्वा सूचनानुसारम् उत्तरत।**

पुरा सत्राजिन्नृपः सूर्यस्य परमभक्त आसीत्। तस्य भक्त्या सन्तुष्टो विवस्वान् तस्मायतिभास्वरं मणिमयच्छत्। तं मणिं कण्ठे धारयन् सत्राजित् कदाचित् कृष्णं द्रष्टुं गतः। स मणिः प्रतिदिनमष्टौ भारान् सुवर्णं सृजति। यत्र च देशे स मणिस्तत्र दुर्भिक्षव्याधिभूतपिशाचानां बाधा न भवति इति तस्य मणेः प्रभाव आसीत्। तत् जानन् कृशानः सत्राजितं तं मणिमयाचत। परं सत्राजित् नान्वमन्यत याचमानस्य कृष्णस्य प्रार्थनाम्।

१) सन्धीन् विघटयत। (०५)

१. परमभक्त आसीत् २. सन्तुष्टो विवस्वान् ३. तस्मायतिभास्वरम्
४. स मणिः ५. प्रभाव आसीत्

२) समासविग्रहं नामनिर्देशपूर्वकं कुरुत। (१०)

१. अतिभास्वरम् २. प्रतिदिनम् ३. दुर्भिक्षव्याधिभूतपिशाचानाम्
४. सत्राजिन्नृपः ५. परमभक्तः

**प्र.४. अ) तालिकां पूरयत।(१२तः१०)** (१०)

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः/पुरुषः |
|---|---|---|---|
| ------ | ------ | रमध्वम् | मध्यमपुरुषः |
| अस्याः | ------ | ------ | पञ्चमी |
| ------ | गोभ्याम् | ------ | तृतीया |
| ------- | ऊचतुः | ------ | प्रथमपुरुषः |
| प्रणंस्यामि | ------- | ------ | उत्तमपुरुषः |

**आ) रूपाणि लिखत।(१२तः१०)** (१०)

१.रुदन्ति २. मनः ३. रोदिषि ४. चक्षुषाम् ५. निघ्नन्तु ६. शृणु
७. फणिनः ८. विद्वद्भिः ९. जानति १०. भ्रूणाम् ११. संसदि १२. पिपासितः

**इ कंसगतशब्दानां योग्यरूपाणि लिखत(७तः५)** (०५)

१. चैत्रमासः ----- पूर्वम् आगच्छति।(वैशास्त्र)
२. ------ स्वाहा।(अग्नि)
३. दुर्वासाः ----- कुप्यति।(इन्द्र)
४. शरीरे हृदयस्य स्थापनं ------ सदृशं वर्तते। (पुण्डरीक)
५. द्वारपालः शीघ्रं ----- प्रविशति।(राजसभा)
६. सः छात्रः------ कुशलः।(चित्रकला)
७. जलत्रम् अस्मान् ----- रक्षति।(वृष्टि)

----------